GODAVARMAYASOBHŪṢANA

OF

ARUNAGIRIKAVI

PUBLISHED BY

THE UNIVERSITY MANUSCRIPTS LIBRARY,

TRIVANDRUM.

TRIVANDRUM

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1946.

INTRODUCTION

Gōdavarmayaśobhūṣana of Aruṇagirikavi is a short work dealing with the arthālankāras, modelled on the *arthālaṅkāra-prakaraṇa* of Vidyānātha's *Pratāparudrayaśobhūṣana*, the illustrative verses being composed in praise of King Godavarma of Bimbali.

The author Arunagiri, we understand from the colophon to the work, was a Brahmin hailing from Coladeśa, and was the son of one Śeṣādri and disciple of Venkatādri, and belonged to the Kaundinyagotra There are three Arunagiris known to students of the Sanskrit literature of South India Two of them were the protéges of Vijayanagar kings; Dindimakavisārvabhauma Arunagirinātha I, the protégé of Devarāya II (A D 1422—1448) and the author of *Somavallīyogānanda-prahasana*[1], and Kumāradindima Arunāgirinātha II, the protége of Kṛṣnadevarāya (A D. 1509—1530) and the author of *Vīrabhadravijaya*[2] The third Arunagiri is Aruṇagirinātha *alias* Arunācalanātha, the author of the commentaries *Prakāśikā* on Kālidāsa's *Raghuvaṁśa* and *Kumārasambhava*[3]. But none of these Arunagiris can be identified with the author of this *Yaśobhūṣana*, for the details supplied by the author regarding himself do not apply to any of these. The Dindima Arunagiri is belonged to the Gautamagotra[4], and also lived before our author[5], and the commentator Arunagiri was the

1. M. Krishnamachariar, *History of Classical Sanskrit Literature*. p. 222
2. *Ibid* p.223
3. The commentary on the first six cantos of *Raghuvaṁśa* has been published by the Mangalodayam Press, Trichur, and that on *Kumārasambhava* in the Trivandrum Sanskrit Series, Nos 27, 32 and 36
4. M Krishnamachariar, op cit, p 221
5. *Vide infra*, p iv

son of one Rāmadatta[1], and was probably a non-Brahmin[2]. So Arunagirikavi is different from these. Nothing more is known about him except that he is also the author of a stotra *Gaurīśataka* from which he quotes a śloka in this work[3], but no manuscript of this work seems to have been known.

Godavarma eulogised in this work was a king of Uttarabimbali[4], that is Vatakkumkūr, a small principality in medieval Kerala, annexed to Travancore by Mārtāṇḍavarma Mahārāja in A. D. 1754 Though small, Vatakkumkūr was a powerful and prosperous country during the days of the Portuguese and the Dutch in Malabar, and was one of the four subordinate kingdoms under Cochin, the other three being Porakad, Parur and Alangad[5]. In Dutch records it is mentioned as Berkenkoor, and was well-known among the foreigners for its abundance of pepper. A large portion of the modern Kottayam Division in Travancore seems to have been under the sway of Vatakkumkūr in those days. As for the identity of the king Godavarma, we find a Godavarma of Bimbali eulogised by Vāsudeva in his *Bhṛṅgasandeśa* in the verse[6]:

हृत्वं नत्वा गिरिवरसुतां गोदवर्मक्षितीन्दो-
रग्रे सम्भावय पुरवरं प्रस्फुरद्धेमसालम् ।

1. Cf. *Raghuvamśa*, Trichur Edn., p 87.
इति रामदत्तसूनुना अरुणगिरिनाथेन विरचितायां रघुवंशप्रकाशिकायां प्रथमसर्गः ।

2. Cf अरुणाचलनाथेन द्विजपादाब्जसेविना ।
क्षितदासापराख्येन मया टीका वितन्यते ॥
(*ibid*, p 3.)

3. *Vide infra*, p 18

4. *Vide infra* उत्तरबिम्बलधरणीवलक्षामन etc , (p. 42), राजन्नुत्तरबिम्बलेश etc , (p 15), पद्मनाभक्षितीशोत्तरबिम्बलेश etc , (p 46), etc.

5. *Vide Keralappalliu*. Edited by Mahakavi Rao Sahib Ulloor S. Parameswara Aiyar. Sri Mulam Malayalam Series, Trivandrum, No. [illegible] p. iv Bimbali is the Sanskritised form of Vempoli, by which name the country was known before it was bifurcated into North-Vempoli (Vatakkumkūr) and South-Vempoli (Tekkumkūr) *Vide Travancore Archaeological Series*, Vol II, p 111.

6. *Bhṛṅgasandeśa* Trivandrum Sanskrit Series, No. 128, p 8.

यद्युद्वेषु त्रुटितविमतस्तोमकण्ठान्त्रदाम्नः
प्रच्छन्नाशेष्वसिलतिकया दिद्युते विद्युतेव ॥

(Delmea ...

and by Melputtūr Nārāyana Bhattatiri in the following verses[1]:

त्वत्कीर्तिप्रसरे सितान्तधवले प्रौढां त्रिलोकीवधूं
द्रागालिङ्गति विम्बलीश ! किमिव ब्रूमस्तदीयां दशाम् ।
हर्षान्मीलितसर्कचन्द्रनयनद्वन्द्वं तमःकैशिकं
व्यामुक्त गलितं नृपान्तरयशःक्षौमं क्षमावल्लभ ! ॥ १ ॥

समीकरोषि स्वमनो दधानः
समीकरोषि द्वितयानरातीन् ।
असंश्रितत्वानपि संश्रितत्वा-
न्धरेन्द्र(व)त्सौवपदे करोषि ॥ २ ॥

कृपाणीयं (वि)म्बल्यधिप ! रणमत्तारिपटली-
गलोत्कृ(त्ति, ?र्त्ति)कर्त्री रुधिरकणसिक्ती तव भुजे ।
जगद्यात्राकामिकबलनकणेघातकलना-
रसार्ता कार्तान्तीं परमनुसरीसर्ति रसनाम् ॥ ३ ॥

कालाम्भोदालिकेशी कुलगिरिकुचभाराधितेयं त्रिलोकी-
बिम्बोष्ठीं विम्बलीश ! त्वदुपगमसमुत्कण्ठया ताम्यतीव ।
अन्तस्सन्तापभारं कलयति यदियं त्वत्प्रतापोष्मरूपं
कीर्तिच्छायापदेशाद्वहति च नितरां सर्वतः पाण्डिमानम् ॥ ४ ॥

स्वद्धाम्ना काञ्चनाद्रौ द्रवति सुरगणाः प्रापुराजौ विरिञ्चं
सोऽयं प्रागेव शम्भुं शरणमुपगतः पङ्कजम्लानिखिन्नः ।
शम्भुः प्रागेव यातो रजतगिरिविनाशाकुलः पद्मनाभं
सोऽपि क्षीराब्धिशोषादवशमतिरगात्त्वन्मनीषां विशालाम् ॥ ५ ॥

अयि गिरिवरकन्ये ! नित्यमेतावदेव
प्रणयविवशभावात्तावदभ्यर्थयेऽहम् ।
जयतु चिदवन्ध्यां प्राप्तनिस्सीमशर्मा
विदलितरिपुमर्मा गोदवर्मा सुकर्मा ॥ ६ ॥

त्वय्युद्दामप्रलब्धप्रणयरसमयं साधु-पाथेयजातं
संगृह्णन्तो दिगन्तप्रसर(ण)निपुणैस्त्वद्यशोभिस्सहायैः ।
त्वत्संवासोत्सवानां चिरमनुभवात् खेदयन्तोऽपि राजन् !
संघस्सम्प्राप्तिसङ्कल्पनकुतुकवशादाश्वसन्तो व्रजामः ॥ ७ ॥

1 Palace Library, Trivandrum, Ms. No. 1658 N,

The qualities attributed to Godavarma by these two poets, especially his unique swordsmanship, which stands out as his most prominent characteristic, well apply to the Godavarma described by Aruṇagiri[1]. Therefore it is likely that the Godavarma of Aruṇagiri is the same as the king extolled by Vāsudeva and Bhaṭṭatiri. If this identification is correct[2], Aruṇagiri and his patron can be placed in the latter half of the 16th and the former half of the 17th centuries A. D. when Bhaṭṭatiri and Vāsudeva lived[3].

The importance of *Godavarmayaśobhūṣaṇa* consists, not in its historical information, of which there is little, but in its being a manual on the *arthālaṅkāras* generally recognised by Sanskrit rhetoricians, and in its fairly good poetry. In this respect it is very much like the *Pratāparudrīya*, which, as already mentioned, it follows in the main. But the following differences may, however, be noted between the two works:

Firstly, *Godavarmayaśobhūṣaṇa* mentions three alaṅkāras more than *Pratāparudrīya*, namely *parikarāṅkura*, *tatkara* and *praśnottara*. Of these

1 Vide, for instance the ślokas श्रीमद्बिम्बल etc. (p. 11), तव बाहुभुजङ्ग etc., (p. 13), उद्दण्डबाहुदण्डाग्रे etc. (p. 31), कण्ठं द्विषा etc. (p. 36), कराग्रजाग्रत् etc. (p. 37), and करालो कापि etc. (p. 40) where his swordsmanship is particularly emphasised.

2. Our identification of Godavarma is only conjectural, as there are certain literary records in Malayalam which speak of a Godavarma of Bimbali (cf. Mahakavi, Rao Sahib Ullur S. Paramaswara Aiyar: *Sāhityaparisat Traimāsikam*, Ernakulam, Vol I, pp. 138–39) and also certain Portuguese records which speak of a king of the same name in high terms (cf. M. R Balakrishna Warrier, *Prabandhamañjari* Pt. II, Trivandrum, pp 156–57), It has not been possible to identify these Godavarmas.

3 *vide* Introduction to the *Matsyāvatāra-prabandha* in I. 2 of this Journal, where the date of Bhaṭṭatiri is given as 1560–1666 A. D Vāsudeva was a contemporary of Bhaṭṭatiri, as he mentions him in the *Bhṛngasandeśa* (p. 17)

parikarāṅkura is seen in Appayya Dīkṣita's *Kuvalayānanda*, but the other two are not regarded as independent alaṅkāras in any of the common works on the subject. *Tathara* is the same as what Vidyānātha illustrates as another variety of *samuccaya*, and it is noteworthy that Aruṇagiri himself calls it only as a variety of *samuccaya*[1], though he gives it a separate name. *Praśnottara* is usually included in *uttara*. Jayadeva in his *Candrāloka*, however, speaks of a *praśnottara*[2], but it is the same as Arunagiri's *uttara*.

Secondly, the order in which the alaṅkaras are dealt with in the two works is slightly different. There is a logical sequence in the order adopted in *Pratāparudrīya*, but not so much in *Godavarmayaśobhūṣaṇa*.

Thirdly, certain items dealt with in *Pratāparudrīya* are not seen in the *Godavarmayaśobhūṣaṇa* the variety of *śleṣa* called *prakṛtāprakṛtaśleṣa*, *arthāntaranyāsa* through *kāryakāraṇabhāva*, *virodha* without *śleṣa*, and *virodha* and *ekāvalī* through *niṣedha* are instances.

Lastly, certain items not dealt with in *Pratāparudrīya* are seen in *Godavarmayaśobhūṣaṇa*: the variety of *upamā* called *varnyavācakaluptopamā* (*i.e.* *upamā* in which both the *upameya* and the *upamāvācakaśabda* are omitted), *upameyopamā* by *vastuprativastubhāva*, the division of each of the three varieties of *dīpaka* into two according to *guṇa* and *kriyā*, *nidarśanā* by *sambhavaddharmayoga*, the threefold division of *arthāpatti*, and the variety of *uttara* through obscurity in the answer, are instances

1. *Vide infra* p. 45 स समुच्चयभेद एव ।
2. *Candraloka*, V. 108

Among the works on alaṅkāra quoted from in this *Yaśobhūṣana* are *Kāvyaprakāśa*[1] (of Mammaṭa) and *Bindvalaṅkāra*[2] (of Harihara), which are quoted in it by name, and *Kāvyādarśa* of Daṇḍin[3] and *Kāvyālaṅkārasārasaṅgraha* of Udbhaṭa[4], which are quoted anonymously[5]. The other quotations in the work are the verse कुटिलालकैकलसन्तीं etc[6] from the author's own *Gaurīśataka*, and the verses वह्वलुना etc.[7] and अन्नानुगोदं etc[8] from Kālidāsa's *Raghuvaṁśa*.

The present edition is based on a single palmleaf manuscript of the work in the Curator's Office collection in this Library, No 164. It was procured from Sri Subrahmanyan Moothatu, Puttiyil, Haripad, and is written in Malayalam script.

---

1 *Vide infra*, p 29.

2. *Vide infra*, p 23. It is uncertain whether *Bindvalaṅkāra* is quoted from its original or from the quotation cited from it in Vidyādhara's *Ekāvalī*, for the stanza quoted is the same as in *Ekāvalī*, and no other work is known to have any quotation from this rare work, nor is any manuscript of it known. Even in *Ekāvalī* this is the only verse quoted from this work. *Vide Ekāvalī* of Vidyādhara, edited by K P Trivedi, Bombay, 1903, p 242.

यदुक्तं बिन्दुलङ्कारे कविचक्रवर्तिना हरिहरेण

'यु. प्रस्तुताप्रस्तुतयोर्वर्गे कुत्रापि सङ्गत ।
समानो धर्म एकोऽन्यद्दीपयेत्तत्तु दीपकम् ॥'

इति ।

3 *Vide infra*, p 17. मन्ये शङ्के etc (*Kāvyādarśa*, II 234).

4 *Ibid*, लोकातिक्रान्तविषया etc (*Kāvyālaṅkārasārasaṅgraha*, III 5).

5 Another verse यथारुचि यथार्थित्वं etc has also been quoted (p 16), but it has not been possible to trace its source.

6 *Vide infra*, p 18.

7 *Vide infra*, p 10 (*Raghuvaṁśa*, V 68).

8 *Ibid*, (*Raghuvaṁśa*, XIII 35).

॥ विषयानुक्रमणा ॥

	पृष्ठम्
मङ्गलाचरणम्	१
उपमा	१
अनन्वयः	९
उपमेयोपमा	९
स्मृतिः	१०
रूपकम्	११
परिणामः	१३
सन्देहः	१४
भ्रान्तिमान्	१५
अपह्नवः	१५
उल्लेखः	१६
उत्प्रेक्षा	१६
अतिशयोक्तिः	२०
तुल्ययोगिता	२२
दीपकम्	२३
प्रतिवस्तूपमा	२४
दृष्टान्तः	२४
निदर्शना	२५
व्यतिरेकः	२६
सहोक्तिः	२६
विनोक्तिः	२७
समासोक्तिः	२७
परिकरः	२८
परिकराङ्कुरः	२८
श्लेषः	२८
अप्रस्तुतप्रशंसा	२९

	पृष्ठम्
अर्थान्तरन्यासः	३१
पर्यायोक्तम्	३१
व्याजस्तुतिः	३२
आक्षेपः	३२
विरोधः	३३
विभावना	३४
विशेषोक्तिः	३५
असङ्गतिः	३६
विशेषः	३६
अधिकः	३६
विचित्रम्	३७
अन्योन्यः	३७
विषमः	३८
समः	३८
अनुमानम्	३९
काव्यलिङ्गम्	३९
यथासङ्ख्यम्	३९
कारणमाला	४०
एकावली	४०
मालादीपकम्	४०
सारः	४१
परिवृत्तिः	४१
परिसङ्ख्या	४१
अर्थापत्तिः	४२
विकल्पः	४३
समुच्चयः	४४
तद्गुणः	४४
समाधिः	४५

पुटम्

प्रत्यनीकम्	...	...	४६
व्याघातः	....	....	४६
पर्यायः	...	...	४६
प्रतीपम्	...	...	४७
मीलनम्	...	...	४८
सामान्यम्	...	...	४८
तद्गुणः	...	...	४९
अतद्गुणः	...	...	४९
उत्तरः	...	....	४९
प्रश्नोत्तरः	...	...	५०
सूक्ष्मः	...	...	५०
व्याजोक्तिः	...	...	५१
वक्रोक्तिः	....	...	५१
स्वभावोक्तिः	...	....	५२
भावकः	....	...	५२
उदात्तः	...	...	५२
संसृष्टिः	...	...	५२
सङ्करः	....	...	५३

॥ श्रीः ॥

अरुणगिरिकविकृतं

गोदवर्मयशोभूषणम् ।

कल्याणं कलयन्तु भूरि शिवयोः कल्याणवेद्यां मिथो
लज्जाकूतदरोदयादसकलं पर्यायतः पश्यतोः ।
फुल्लेन्दीवरपुण्डरीकरुचिभिर्नीलामलार्धं वपुः
कुर्वद्भिः समभावि भाविचरितं यैस्ते कटाक्षाङ्कुराः ॥

अपिच,

अङ्के पङ्केरुहस्य प्रतिवसति विधिर्यस्य नाभीसरस्याः
पर्यङ्के यः फणीन्द्रे भजति परिचिते प्रायशो योगनिद्राम् ।
सोऽयं हस्तारविन्दस्फुरदरिनलिनो भार्गवीभूमिसेव्यः
श्रेयः श्रीगोदवर्मक्षितिरमणमणेरावहत्वम्बुजाक्षः ॥

वाणीपाणिसरोजशोणनखरश्रीकोणवीणारव-
श्रेणीनिर्भरमाधुरीरसलसद्वेण्युत्किरा यद्गिरः ।
सोऽयं सत्कविसम्मतोऽरुणगिरिः श्रीगोदवर्मप्रभो-
रर्थालङ्कृतिमद्भुतां वितनुते हृद्यां यशोभूषणम् ॥

अथ शब्दालङ्कारादर्थालङ्काराणामभ्यर्हितत्वात्तत्रापि प्रथममनेकालङ्कारानुगतत्वा-दुपमालङ्कारो निरूप्यते —

उपमालङ्कार ।

हृद्यं साधर्म्यमुभयोरेकदा यत्र वर्ण्यते ।
मिथस्तत्रोपमा प्रोक्ता सूरिभिः सूक्ष्मवेदिभिः ॥ १ ॥

यत्र हृद्यं सहृदयहृदयाह्लादि साधर्म्यं धर्मतः सादृश्यम् उभयोर्वस्तुनोः मिथः परस्परमेव एकदा सकृदेव वर्ण्यते तत्र उपमा उपमालङ्कृतिरिति सूक्ष्मार्थवेदिभिः सूरिभिः प्रोक्तेत्यर्थः । हृद्यमित्यनेन अश्वः श्वेव प्रधावति,

'प्रसन्नमाननं तस्याः प्रभातेन्दुरिवैधते' ।

इत्यादिदुष्टन्यूनोपमादीनां व्यावृत्तिः । साधर्म्यमिति श्लेषालङ्कारव्यावृत्तिः । तत्र धर्मतस्सादृश्याभावात् । किन्तु शब्दत एव । उभयोरित्यनन्वयव्यावृत्तिः । तत्र एकस्यैव स्वेनैव साम्यवर्णनात् । एकदेति उपमेयोपमा व्यवच्छिद्यते । तत्र द्वयोः पर्यायेण साम्यकथनात् । मिथ इत्यनेन शृङ्खलोपमादिव्यावृत्तिः । वर्ण्यत इति गम्यौपम्यानां रूपकपरिणामसन्देहभ्रान्तिमदुल्लेखापह्नवतुल्ययोगितादीपकप्रतिवस्तूपमादृष्टान्तसहोक्तिव्यतिरेकनिदर्शनानां वैलक्षण्यमुक्तम् । हृद्यं साधर्म्यमिति सहृदयसम्मतेन कविकल्पितेन धर्मेण साम्यं विवक्षितं, न तु वस्तुत्वप्रमेयत्वादिना । तेन हि उपमादयः कविकल्पिता एवालङ्कारतां भजन्ते । तत्तु गोसदृशो गवय इति उपमा, आदित्यो यूप इति रूपकं, स्थाणुर्वा पुरुषो वेति सन्देहः, इदं रजतमिति भ्रान्तिमान्, नायं सर्प इत्यपह्नुतिः, पीनो देवदत्तो दिवा न भुङ्क्ते इति पर्यायोक्तिः, समुद्रः कुण्डिकेत्यतिशयोक्तिः, पर्वतोऽग्निमानित्यनुमानं, स देवदत्त इति स्मरणं, तस्थुस्थमिपां तान्तन्ताम इति यथासङ्ख्यं, पुत्रेण सहागतः पितेति सहोक्तिः, पुत्रेण विनागत इति विनोक्तिः, श्वेतो धावतीति श्लेषः, इत्यादि द्रष्टव्यम् ।

उपमा द्विविधा पूर्णा लुप्ता चेति प्रभेदतः ।
पूर्णा श्रौती पुनश्चार्थी द्विविधेति प्रकीर्तिता ॥ २ ॥

त्रिविधे ते पुनर्वाक्यसमासपदतद्धितैः ।

यत्र उपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णामुपादानं तत्र पूर्णा । तत्राप्युपमावाचकयथेवादिशब्दानां प्रयोगे श्रौती । धर्मिव्यवधानेन सदृशसङ्काशादिशब्दानां प्रयोगे त्वार्थी । तत्र वाक्यगा श्रौती पूर्णा यथा —

स्फारोदारपयःपयोधिलहरीभागर्वसर्वङ्कष-
स्थेमा मौलिसभाजितस्वमहिमा प्रख्यात²थ्वीभृताम् ।
मान्या श्रीसहजा मुदं कुवलयस्यापादयन्ती परां
कीर्त्तिस्ते भुवि गोदयर्मनृपते ! भाति प्रभेन्दोरिव ॥

अत्र उपमानादीनां चतुर्णामुपादानात् पूर्णता । ननु पृथ्वीभृन्मौलिमहितत्वश्रीसहजत्वकुवलयामोदकत्वानां कथं साधारणत्वम्, एकत्र पृथ्वीभृतः पर्वताः अन्यत्र राजानः, एकत्र श्रीः लक्ष्मीः परत्रैश्वर्य, कुत्रचित् कुवलयं नीलोत्पलम् इतरत्र भूवलयमिति भेदादिति चेन्मैवम् । श्लेषभित्तिकाभेदाध्यवसायेन बिम्बप्रतिबिम्बभावेन वस्तुप्रतिवस्तुभावेन वा साधारणधर्मप्रतिपादनमिति आलङ्कारिकैरङ्गीकारात् ।

समासगा श्रौती पूर्णा यथा —

कलयन् कमलोल्लासं गलपयन् परराजमण्डलं कान्त्या ।
भास्वानिव प्रतापस्तव भुजयोर्बिम्बलेश ! जयतितराम् ॥

अत्र 'इवेन सह नित्यसमासो विभक्त्यलोपश्च' इति विधानात् समासगा ।

तद्धितगा श्रौती पूर्णा यथा —

प्रख्यातसारे नृप ! गोदवर्म-
प्रभो ! धुरीणे तव बाहुदण्डे ।
उर्वी परं दुर्वहभारगुर्वी
दर्वीकराधीश्वरवद्बिभाति ॥

अत्र 'तत्र तस्येव' इति इवार्थे वतेर्विधानात् श्रौतीत्वम् ।

वाक्यगा आर्थी पूर्णा यथा —

अभिमतमर्थं वितरन्नर्थिसमूहस्य गोदवर्मनृप ! ।
सुमनोमहितस्सदृशो भाति भवान् कल्पवृक्षस्य ॥

अत्र धर्मिव्यवधानेन सदृशपदादौपम्यप्रतिपादनादार्थी ।

समासगा आर्थी पूर्णा यथा —

लोकरक्षणविधासु निरूढ-
प्रौढभीमभुजधामविगाढः ।
गोदवर्मनृपतिः क्षितिजम्भ-
द्वेषणो विजयते हरितुल्यः ॥

अत्र हरितुल्य इति समासगा आर्थी ।

तद्धितगा आर्थी पूर्णा यथा —

भीमसेनानुगो नित्यं विजयेन समन्वितः ।
धर्मपुत्रवदाभाति धृतिमान् बिम्बलेश्वरः ॥

अत्र 'तेन तुल्यं क्रिया चेद्वतिः' इति तुल्यार्थे वतेर्विधानादार्थी ।

एवं षट्प्रकारा पूर्णा प्रदर्शिता ।

अथ लुप्ता—

पूर्णावद्धर्मलुप्तापि श्रौतीं तद्धितगां विना ॥ ३ ॥
श्रौत्यार्थीभेदसहिता पञ्चधा परिकीर्त्तिता ।

धर्ममात्रलोपे धर्मलुप्ता । सापि पूर्णावत् श्रौत्यार्थीभेदभिन्ना भवति । श्रौती लुप्ता वाक्यसमासाभ्यां द्विविधैव, न तु तद्धितेऽपि । कल्पबादिप्रयोगे त्वार्थ्येव । तेन पञ्चविधा धर्मलुप्ता । क्रमेणोदाहरणं—

वक्त्रं यथा वारिरुहं सुधेव
सूक्तिर्भुजौ भोगिपतेः समानौ ।
वक्षः कवाटप्रतिमं वपुश्च
कन्दर्पकल्पं तव गोदवर्मन् ! ॥

वक्त्रं यथा वारिरुहमिति वाक्यगा श्रौती । सुधेव सूक्तिरिति समासगा श्रौती । भुजौ भोगिपतेः समानौ इति वाक्यगा आर्थी । वक्षः कवाटप्रतिममिति समासगा आर्थी । वपुश्च कन्दर्पकल्पमिति तद्धितगा आर्थी । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति विधानात् । सर्वत्र आह्लादकरत्वमाधुर्यदैर्घ्यवैशाल्यसौन्दर्यादिसाधारणधर्माणामनुपादानाद् धर्मलुप्तात्वम् ।

इवादिलुप्ता णमुलि क्यचि क्यङि णिनौ तथा ॥ ४ ॥
समासे चेति गदिता सप्तधा बुधसत्तमैः ।

कर्तृणमुलि यथा —

दिगन्तगिरिदन्तुरोदरदरीगृहाभ्यन्तरे
निरन्तरकुडुम्बितावहनिजारिपृथ्वीभृतः ।
तपञ्जयति सन्ततं तपनतापमुच्चावचः
प्रतापमहिमा तव प्रथितगोदवर्मप्रभो ! ॥

तपनतापमित्यत्र तपन इवेत्यर्थः । वाचकमात्रलोपः, तापस्य साधारणधर्मस्य ग्रहणात् । कर्तरि 'उपमाने कर्मणि च' इति णमुल्प्रत्ययः ।

कर्मणमुलि यथा—

विलोकन्ते नित्यं निजसुतविलोकं हरिणकान्
प्रियादर्शं पश्यन्त्युरुविपिनभागेषु चमरीः ।
स्मरन्त्यत्र स्वीयं नगरमटवीस्मारमरय-
स्त्वदीयाः स्खलन्तो गिरिषु बहुधा बिम्बलपते ! ॥

अत्र हरिणकान् निजसुतविलोकं निजसुतानिव विलोकन्त इत्यर्थः । एवमुत्तरत्रापि । अत्रापि वाचकमात्रलोपः । विलोकनं दर्शनं स्मरणं च साधारणधर्मः ।

कर्मक्यचि यथा —

मित्रीयत्यखिलभटान् पुत्रीयति च प्रजाश्चिराय निजाः ।
अमरीयति बुधलोकानतुलो भुवि गोदवर्मभूपालः ॥

अत्र भटान् मित्रीयति मित्राणीवाचरति । पुत्रीयति पुत्रानिवाचरति, अमरीयति अमरानिवाचरतीत्यर्थः । अत्र सर्वत्र आचरणं समानधर्मः । वाचकस्यैव लोपः । 'उपमानादाचारे' 'अधिकरणाच्चेति वक्तव्यम्' इति कर्माधिकरणयोः क्यच्प्रत्ययः ।

आधारक्यचि यथा —

क्रीडागिरीयन्ति महीधरेषु
केलीवनीयन्ति च काननेषु ।
निकेतनीयन्ति दरीषु नित्यं
प्रत्यर्थिनो बिम्बलभूवलारेः ॥

अत्र क्रीडागिरीयन्ति क्रीडागिरिष्विव आचरन्ति इत्येवमर्थो द्रष्टव्यः । अत्राप्याचरणं समानधर्मः । इवमात्रलोपः ।

कर्तृक्यङि यथा —

दावायन्ते विमतनगरीघोरणीनिष्कुटानां
दीपायन्ते शबरपरिषत्सुन्दरीणां दरीषु ।
अर्कायन्ते विबुधनलिनीपुष्कराणामजस्रं
धीरक्षोणीपरिवृढभुजादण्डचण्डप्रतापाः ॥

अत्र दावायन्ते दावा इवाचरन्ति, दीपायन्ते दीपा इवाचरन्ति, अर्कायन्ते अर्का इवाचरन्तीत्यर्थः । 'कर्तुः क्यङ् सलोपश्च' इति क्यङ्प्रत्ययः । अत्राचरणं समानधर्मः । इवशब्दस्य लोपः ।

णिनिप्रत्यये यथा—

प्रवालवल्लीपरिशोभिनीनां प्रभिन्नदन्तावलगामिनीनाम् ।
मनांसि रज्यन्ति मृगेक्षिणीनां श्रीगोदवर्मण्यखिलाङ्गनानाम् ॥

अत्र प्रवालवल्य इव परिशोभन्ते, प्रभिन्नदन्तावला इव गच्छन्ति, मृगा इव ईक्षन्ते इत्यर्थे 'कर्तर्युपमाने' इति णिनिप्रत्ययः । शोभागमनेक्षणानि साधारणधर्माः । इवलोपश्च ।

समासे यथा —

प्रवालपेशलौ पादौ गोदवर्मक्षमापतेः ।
कथं सहेते कोटीरमणीषु स्खलनं द्विषाम् ॥

अत्र प्रवालाविव पेशलौ मृदुलौ इति समासे वाचकलुप्ता । 'उपमानानि सामान्यवचनैः' इति समासः । पेशलत्वं समानधर्मः ।

द्विधोपमानलुप्ता च प्रोक्ता वाक्यसमासयोः ॥ ५ ॥

वाक्यगा उपमानलुप्ता यथा —

द्वारे मत्तद्विरदनिवहा यत्कटाक्षेक्षितानां
दूरे वाचामपि च सुधियां सम्पदो यद्वरन्ताः ।
श्रीमद्बिम्बल्यधिपतिमणेस्तस्य तुल्यस्त्रिलोक्यां
भूतो भावी भुनक्ति भवन्नस्ति नान्यो वदान्यः ॥

अत्र बिम्बल्यधिपतेस्तुल्यो नास्ति इत्युपमानस्यानुपादानाद् वदान्य इति सामान्यधर्मग्रहणाच्च वाक्यगा ।

उपमानलुप्ता समासगा यथा —

लोकालोकक्षितिधरतटेष्वन्तरा कन्दराणां
भूम्ना यस्य प्रहततमसा नक्तमप्यात्तहर्षाः ।
खेलन्ते यत्सहचरकुलैश्चक्रवाक्यस्समस्ताः
कस्तद्बिम्बल्यधिपतिमणेस्तत्प्रतापप्रतिश्रीः ॥

अत्र यस्य प्रतापस्य भूम्ना नक्तमपि चक्रवाक्यः सहचरकुलैस्सह खेलन्ते तत्प्रतापप्रतिश्रीः तस्य प्रतापस्य प्रतिश्रीः समानश्रीः कः ? न कोऽपीत्यर्थः । तत्प्रतापप्रतिश्रीरिति समासात् समासगा । उपमानस्यानुपादानाच्च उपमानलुप्ता ॥

धर्मवाचकलुप्तापि द्विविधा क्विप्समासयोः ॥ ५ ॥

क्विपि धर्मवाचकलुप्ता यथा—

अश्रान्तं वरगोदवर्मधरणीकान्तस्य कीर्तिच्छटा-
व्याप्त्यात्यन्तपरिष्कृते त्रिभुवनाभोगे दुरन्ते पुनः ।
कैलासन्त्यखिलक्षमाधरगणाः क्षीरार्णवन्त्यम्बुधयः
शेषन्त्यन्यभुजङ्गमाः सुरसरित्पूरन्ति सर्वापगाः ॥

अत्र कैलासन्ति कैलासवदाचरन्तीत्यादौ वाचकलोपः । 'उपमानादाचारे' इत्यधिकारविहितक्विपो लोपे आचाररूपसमानधर्मस्यापि लोपः ।

समासे धर्मवाचकलुप्ता यथा—

चित्रं ते नरसिंहत्व गोदवर्ममहीपते ! ।
हिरण्यदानमनिशं क्रियते भवता यतः ॥

अत्र नरः सिंह इवेत्यत्र 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति समासाद्धर्मवाचकयोर्लोपः ।

धर्मोपमानलुप्तापि द्विधा वाक्यसमासतः ॥ ६ ॥

धर्मोपमानलुप्ता वाक्यगा यथा—

भूमिपालनपरोऽयमुदारो
गोदवर्मनृपतिर्जयतीह ।
यत्प्रतापयशसोरपि तुल्यं
वस्तु किञ्चिदपि नास्ति जगत्याम् ॥

यत्प्रतापयशसोस्तुल्यं वस्तु नास्तीत्युपमानानुपादानं सामान्यधर्माभावश्च । अपीत्युक्त्या गोदवर्मक्षितिपतिसमानो लोके नास्त्येव सुतरामिति गम्यते ।

समासगा धर्मोपमानलुप्ता यथा—

कति सन्ति महीभुजो न दृष्टाः
क्रमशो देशमशेषमाविशद्भिः ।
ननु बिम्बलभूमहेन्द्रतुल्यो
न च कश्चित् क्वचिदस्ति विष्टपेषु ॥

अत्र बिम्बलभूमहेन्द्रतुल्यो नास्तीत्युपमानधर्मयोरनुपादानम् ।

वर्ण्यवाचकलुप्तापि काचिद् भवति तद्यथा ।

अतिचण्डदण्डभुजदण्डमण्डितः
स्वमकुण्ठधाम भुजयोः प्रदर्शयन् ।
अयमन्तकीयति पुरो विरोधिना-
मिह गोदवर्मनृपती रणाङ्गणे ॥

अत्र विरोधिनां पुरः अयमन्तकीयति आत्मानमन्तकमिवाचरतीत्यर्थात् 'सुप आत्मनः क्यच्' इति क्यचि प्रत्यये आत्मन उपमेयस्य इवशब्दस्यापि लोपः । आचारः समानधर्मो गृहीत इति वर्ण्यवाचकलुप्ता ॥

उपमानेवादिधर्मलुप्ता कापि समासगा ॥ ७ ॥
एवं विंशतिधा प्रोक्ता लुप्ता विबुधसत्तमैः ।

उपमानवाचकधर्मलुप्ता यथा—

पुष्पेषुमूर्तिर्भुवि गोदवर्म-
क्षितीश्वरो यन्निजया गुणाढ्यः ।
कीर्त्या समुत्सारितसज्जनार्त्या
हरित्पतीनप्यधरीकरोति ॥

अत्र पुष्पेषुमूर्तिरित्यत्र पुष्पेषोर्मन्मथस्य मूर्तिरिव मूर्तिर्यस्येति 'सप्तम्युपमानपूर्वपदे'त्यादिना समासाद् उपमानवाचकशब्दयोर्लोपः । सौन्दर्यादिसाधारणधर्मस्यानुपादानाच्च उपमानवाचकधर्मलुप्ता । एवं विंशतिविधा लुप्ता प्रदर्शिता ॥

सामान्यधर्मनिर्देशभेदाद् भिद्येत चोपमा ॥ ८ ॥

तथाहि—सामान्यधर्मनिर्देशः वस्तुप्रतिवस्तुभावेन बिम्बप्रतिबिम्बभावेन श्लेषादिना च भवति । वस्तुप्रतिवस्तुभावेन यथा—

कीर्त्या कलितसम्मोदा जगती गोदवर्मणः ।
विभाति विहितोल्लासा कौमुद्येव कुमुद्वती ॥

अत्र उपमानोपमेयगतधर्मस्यानन्दवत्त्वस्यैकस्य पर्यायशब्दाभ्यामुपादानात् वस्तुप्रतिवस्तुभावः ॥

विम्बप्रतिविम्बभावेन यथा—

प्राप्तो यशःप्रतापाभ्या भाति विम्बलभूपतिः ।
प्रालेयरुचिभानुभ्या सुमेरुरिव सञ्ततः ॥

अत्र यशःप्रालेयरुच्योः प्रतापभान्वोश्च विम्बप्रतिविम्बभावः । भिन्नयोर्धर्मयोः पृथगुपादानं विम्बप्रतिविम्बभावः । एवमादि द्रष्टव्यम् ॥

अनन्वयालङ्कारः ।

उपमानोपमेयत्वे त्वेकस्य स्यादनन्वयः ।

यत्र एकस्यैव उपमानोपमेयभावः तत्रानन्वयालङ्कारः । एकस्यैवोपमानोपमेयत्वकथनं तादृशस्य द्वितीयस्य व्यवच्छेदाय । एकस्यैव विरुद्धधर्मान्वयात् अनन्वयाभिधानमिति द्रष्टव्यम् । यथा—

कल्याणी विम्बलपते ! गुणसम्पदियं तव ।
गुणसम्पदिवाधत्ते कुतुकं तावकी सताम् ॥

अत्र गुणसम्पत् गुणसम्पदिवेत्यनन्वयः । यथा वा—

त्वद्यशस्त्वद्यश इव तव श्रीरपि ते श्रिया ।
समाना भाति सततं गोदवर्ममहीपते ! ॥

अत्र धर्मग्रहणाग्रहणाभ्यां अर्थद्वैविध्यमपि सूचितम् ॥

उपमेयोपमालङ्कारः ।

उपमानोपमेयत्वं पर्यायेण द्वयोर्यदि ॥ ९ ॥
उपमेयोपमा प्रोक्ता सापि द्वैविध्यभाग्यथा ।

पर्यायेण द्वयोर्यत्र उपमानोपमेयभावः तत्र उपमेयोपमालङ्कारः । द्वयोरित्यनन्वयव्यावृत्तिः । पर्यायेणेत्युपमालङ्कारनिवृत्तिः । सापि धर्मसाधारण्येन वस्तुप्रतिवस्तुभावेन च द्विधा ।

आद्या यथा—

दानकीर्त्या भवान् भाति दिशादन्तीव सन्ततम् ।
भवानिव दिशादन्ती विम्बलक्षोणिपालक ! ॥

अत्र उपमेयस्य विम्बलक्षोणिपालकस्य दिशादन्तिनं प्रत्युपमानत्वकथनाच्च उपमेयोपमात्वम् । तच्च तृतीयोपमानान्तरनिवृत्तिद्योतनाय ।

द्वितीया यथा—

अकुण्ठधामायमयुग्मसप्ति-
दुरन्तदीप्तिर्भुजयोः प्रतापः ।
परस्परौपम्यसुभौ प्रकाम-
रम्यं भजेते तव गोदवर्मन् ! ॥

अत्र भानुप्रतापयोः परस्परौपम्यमिति उपमेयोपमात्वम् । नन्वत्र पर्यायेण उपमानोपमेयभावस्याकथनात् कथमुपमेयोपमात्वमिति चेन्न । परस्परौपम्यपदेनैव पर्यायत्वाभिधानात् । अत एव —

"तद्वल्गुना युगपदुन्मिषितेन तावत्
सद्यः परस्परतुलामधिरोहतां द्वे ।
प्रस्पन्दमानपरुषेतरतारमन्त-
श्चक्षुस्तव प्रचलितभ्रमरं च पद्मम् ॥"

इत्यत्र उपमेयोपमालङ्कारत्वम् ॥

स्मृत्यलङ्कारः ।

सदृशार्थस्यानुभवात् सदृशस्मरणं स्मृतिः ॥ १० ॥

यत्र सदृशवस्त्वनुभवेन सदृशपदार्थस्मरण जायते तत्र स्मृत्यलङ्कारः । यथा—

करे धृतशरासनं कमलदीर्घदीर्घेक्षणं
कनत्कनकभूषणं कलितलोकनेत्रोत्सवम् ।
विलोक्य भुवि बिम्बलक्षितिपमत्र वामालकाः
स्मरन्ति किल सन्ततं स्मरमुदग्ररूपाकृतिम् ॥

यत्र सादृश्यानुभवं विना हेत्वन्तरेण स्मरणं न तत्रायमलङ्कारः । यथा—

"अत्रानुगोदं मृगयानिवृत्त-
स्तरङ्गवातेन विनीतखेदः ।
रहस्त्वदुत्सङ्गनिषण्णमूर्धा
स्मरामि वानीरगृहेषु सुप्तिम् ॥"

इत्यत्र न स्मृत्यलङ्कारः ॥

भेदाभेदसाधारणधर्मप्रधाना उक्ताः। इदानीम् अभेदशाधान्येन आरोपगर्भालङ्काराः प्रदर्श्यन्ते—

रूपकालङ्कारः।

विषय्यभेदारोपेण विषयस्योपरञ्जनम्।
अतिरोहितरूपस्य रूपकं प्रोक्तमष्टधा ॥ ११ ॥

यत्र अतिरोहितरूपस्य विषयस्य आरोप्यमाणविषय्यभेदारोपेण रञ्जनं क्रियते तत्र रूपकम्। तच्च अष्टधा प्रोक्तम्। आरोपेणेति उत्प्रेक्षोपमादीनां निवृत्तिः। अतिरोहितस्येत्यनेन सन्देहादिनिवृत्तिः, तत्र विषयस्य सन्देहादिना तिरोधानात्। उपरञ्जनमिति परिणामव्यावृत्तिः। परिणामे आरोप्यमाणस्य प्रकृतकार्योपयोगित्वं, रूपके पुनः प्रकृतोपरञ्जकत्वमात्रमिति द्रष्टव्यम्। तच्च संक्षेपतस्त्रिविधम्— सावयवं, निरवयवं, परम्परितं चेति। सावयवम् अवयविसाकल्यवृत्ति। निरवयवम् अवयवतो निष्क्रान्तम् अवयविमात्रपर्यवसितम्। परम्परा अस्य संजातेति परम्परितम्। तत्र सावयवं द्विविधं— समस्तवस्तुविषयं एकदेशविवर्ति चेति। निरवयवं केवलं मालारूपञ्चेति द्विविधम्। परम्परितं श्लिष्टाश्लिष्टभेदेन द्विविधम्; तच्च प्रत्येकं केवलमालारूपेण द्विविधं सत् चतुर्विधम्। आहत्याष्टविधं रूपकम्। तत्र समस्तवस्तुविषयं सावयवं यथा—

निर्यन्निर्मलचन्द्रकान्तिलहरीनिर्व्यूढमैत्रीभरं
क्षीराब्धिं कुरुते विहारसरसी भूचक्रवालाचलम्।
क्रीडार्द्रिं ककुभस्सखीसमुदयं केलीवनं नन्दनं
श्रीमन्! सम्प्रति गोदवर्मनृपते! त्वत्कीर्तिकन्यामणिः ॥

यथा वा—

श्रीमद्भूविम्बल्यधिपतिकरालङ्क्रियेयं कृपाणी-
वी(रु)द्वैरिक्षतजसलिलैः संभृताश्रान्तसेका।
संभूतौजःप्रकटविटपा सन्ततोद्यत्समज्ञा-
सूनव्यूहैः फलति सुरभिस्वर्गभूमिस्त्रिवर्गम् ॥

अत्र अवयवानां विटपादीनां अवयविभूताया लतादेश्च निरूपणात् समस्तवस्तुविषयत्वम्।

एकदेशविवर्ति यथा—

दरगोदवर्मनृपतौ रणाजिरे रिपुशैलमूर्ध्नि शरवारिसन्ततिम्।
सततं विमुञ्चति समभ्रगर्जिते परितो विभाति भुजधामकन्दली

अत्र अवयवानां शरादीनां वारित्वादिनिरूपणेन अवयविनो गोदवर्मणः वारिधरत्वं गम्यते । ततः अवयविन्येकदेशे विवर्तनात् एकदेशविवर्तित्वम् ।

निरवयवं केवलं यथा —

कोणाघातप्रभूतान् गुरुतरसमरारम्भसंभूतभेरी-
घोरारावान् कृतोद्यत्प्रलयघनततिध्वानकल्पान् प्रतीत्य ।
धावन्ति त्यक्तयाना विमतनृपतयः कानने दीनचित्ता-
स्त्वद्दोर्दण्डप्रताप(द्वि? द्यु)मणिदृढतरोत्तापिता गोदवर्मन्! ॥

अत्र प्रतापस्य (द्वि? द्यु)मणित्वेन निरूपणात् केवलम् ।

मालारूपं निरवयवं यथा—

जयश्रीहारालिर्जनहृदयपाटीरकलना
नभोगङ्गाभङ्गो निखिलजगदुल्लोचनिचयः ।
जटाटीरत्वङ्गद्दृढतरजटाचन्द्रसुषमा
जयत्यच्छा कीर्त्तिर्जगति जयिनो बिम्बलपतेः ॥

अत्र मालारूपेण निरूपणात् मालानिरवयवम् ।

रूपकहेतुरूपकं परम्परितम् । रूपकद्वय(य)मान्यव्यवस्थितत्वात् पूर्वतो भिन्नम् । तत्र श्लिष्टकेवलपरम्परितं यथा—

सुमनःस्तोमसौभाग्यं संवर्धयति तावकः ।
करकल्पतरुः श्रीमन्! गोदवर्मनराधिप! ॥

अत्र करे कल्पतरुत्वारोपणं सुमनसां सतां सुमनस्त्वनिरूपणे हेतुरिति परम्परितम् । सुमनस एव सुमनस इति श्लिष्टशब्दोपादानात् श्लिष्टत्वम् ।

श्लिष्टमालापरम्परितं यथा—

श्रीसंवासरमापतिः श्रितबुधश्लाघासहस्रेक्षणः
सत्संसेवनचन्द्रमाः समुदयप्राकट्यघर्मद्युतिः ।
अश्रान्तोत्कटदानकेलिकरिराडार्यानुवृत्तौ गुहः
सोऽयं राजति गोदवर्मनृपतिः सर्वैः समग्रैर्गुणैः ॥

अत्र प्रकृतराज्ञि रमेशत्वादिनिरूपणं श्रिय ऐश्वर्यस्य लक्ष्मीत्वनिरूपणे हेतुरिति परम्परितत्वम् । श्रीबुधादिशब्दानां श्लिष्टत्वात् श्लिष्टमालापरम्परितत्वम् ।

अश्लिष्टकेवलपरम्परितं यथा —

तव बाहुभुजङ्गखड्गजिह्वा तरलायोधनसोज्झ दुर्मदानाम् ।
ग्रसतेऽसुसमीरणानरीणां जय लक्ष्मीधर ! गोदवर्मभूप ! ॥

अत्र खड्गे जिह्वात्वनिरूपणं बाहोर्भुजङ्गत्वनिरूपणे हेतुरिति परम्परितम् । अश्लिष्टमालापरम्परितं यथा —

त्रिलोकीकासारस्फुरदमलपाथोरुहभरा
दिगाकान्ताहाराः सुरपथमहीरुहसुमनसः ।
सुहृद्भूतक्ष्माभृत्कुलकुमुदशीतांशुकिरणा
यशःपुञ्जा राजन्त्यतुलबलविभ्वल्यधिपतेः ॥

अश्लिष्टमालापरम्परितं वैधर्म्येणापि भवति । यथा —

वैरिक्ष्मापयशोविलासकमलप्रालेयवर्षं पुनः
प्रायः पुञ्जिततत्प्रतापदहनाटोपाभ्युदोज्जृम्भितम् ।
तत्कान्तास्तनचारुमण्डनतटिद्वल्लीगरत्सङ्गतं
धीरश्रीधर ! गोदवर्मनृपते ! त्वद्बाहुलीलायितम् ॥

परिणामालङ्कारः ।

परिणामस्तु स प्रोक्तो विषयो विषयित्वतः ।
भवेत् परिणतो यत्र प्रकृतार्थप्रसिद्धये ॥ १२ ॥

यत्र प्रकृतार्थसिद्धये आरोपविषयः आरोप्यमाणात्मना परिणमते तत्र परिणामालङ्कारः । प्रकृतार्थप्रसिद्धये इति रूपकव्यावृत्तिः । रूपके आरोप्यमाणस्य प्रकृतोपरञ्जकत्वमात्रं, परिणामे त्वारोप्यमाणस्य प्रकृतकार्योपयोगित्वमिति विवेकः । स च सामानाधिकरण्येन वैयधिकरण्येन च द्विविधः । आद्यो यथा —

वीरश्रीधरगोदवर्मनृपते ! त्वद्वैरिकान्ताजनाः
काङ्क्षन्तो भवतः प्रसाधनविधिं काले .. वन्दीकृताः ।
नम्रास्तावकपादपीठमभितो निर्यन्नखश्रीभरैः
पुष्पैर्भूषितकेशपाशनहना धन्या भवन्त्यन्वहम् ॥

अत्र नखश्रीभरैः पुष्पैरिति सामानाधिकरण्यं केवलं नख(द्वि ? त्वि)षां पुष्पात्मना केशप्रसाधनरूपकार्योपयोगित्वात् परिणामः ।

वैयधिकरण्येन यथा —

गेहं चारु गुहाभिरद्भुतलतापुष्पोच्चयैर्भूषणं
चेलं चायतवल्कलैश्चिरतरं क्रीडासरः पल्वलैः ।
मित्रं चापि मृगद्विजैररिनृपाः कृत्वा चिरं कामतः
कान्तारेषु वसन्ति बिम्बलपतेरुद्दामशौर्यार्दिताः ॥

गेहं गुहाभिरिति वैयधिकरण्यम् । गुहा एव गेहं कृत्वेत्यर्थः । अत्र गुहादीनामारोप्यमाणगेहादिरूपेण प्रस्तुतकान्तारवासरूपकार्योपयोगित्वात् परिणामालङ्कारत्वम् ॥

सन्देहालङ्कारः ।

प्रकृतेऽप्रकृतार्थस्य धीर्यत्रान्त्रधारणा ।
साम्याद्भवति तत्रोक्ता सन्देहालङ्कृतिस्त्रिधा ॥ १३ ॥

यत्र प्रकृतार्थे सादृश्याद् अप्रकृतार्थसन्देहः तत्र सन्देहालङ्कारः । स च त्रिविधः शुद्धो निश्चयगर्भो निश्चयान्तश्चेति ।

सन्देहमात्रपर्यवसायी शुद्धः । यथा —

कंसध्वंसी नुहंसीफमितृवररथः किं वतंसीछतेन्दुः
प्रौढप्रालेयभानुः फणिपतिरथवा पाकवैरी स्मरो वा ।
पश्यन्ति त्वामितीश्च ! प्रणतबलिरिपुं भूतिभाजं व्रजेशं
सन्मुख्यं सर्वलोकश्रुतमकरपदं मान्यभोगं च जिष्णुम् ॥

अत्र निश्चयाभावात् सन्देहमात्रपर्यवसायित्वम् ।

निश्चयगर्भो यथा —

किं चन्द्रः स कलङ्कपङ्किलतनुः किं वा पुनः कौमुदी
सापि स्वच्छतुषारवारिफलिलीभावं कथं मुञ्चति ।
किं वा फुल्लनवप्रसूनकलिका भृङ्गेण सा सङ्गता
लोलेनेति विकल्प्यते तव यशः श्रीगोदवर्मप्रभो ! ॥

अत्र तत्तद्भेदकथनात् निश्चयगर्भत्वम् ।

निश्चयान्तो यथा —

किं दावानलहेतयः कमलिनीनेतुः करा जृम्भिताः
किं वा निर्झररत्नगर्भविसरच्छायावितानं किमु ।
इत्थं संशयिनोऽत्र बिम्बलपते ! प्रत्यर्थिपृथ्वीभृतः
पश्चान्निश्चयमाचरन्ति भवतः स्फाराः प्रतापा इति ॥

अत्र दावानलज्वालादिरूपेण संशय्य पश्चान्निश्चयात् निश्चयान्तत्वम् ॥

भ्रान्तिमदलङ्कारः ।

प्रकृतेऽप्रकृतभ्रान्तिः सादृश्याद् भ्रान्तिमान् भवेत् ।

यत्र प्रकृते सादृश्यादप्रकृतभ्रान्तिः तत्र भ्रान्तिमदलङ्कारः । यथा—

लोकालोकदरीपुरीषु विचरत्त्वद्वैरिराजन्यका
वीरश्रीधर! गोदवर्मनृपते! भीताः प्रतापार्दिताः ।
दूरे दावविदह्यमानविपिनश्रेणीभवां वीक्ष्य ते
धूम्यां दुःसहसैन्यधूलिपटलभ्रान्तिं भजन्ते मुहुः ॥

अत्र नीलनिबिडत्वादिसादृश्याद् धूम्यायां सैन्यधूलिभ्रमः ।

अपह्नवालङ्कारः ।

साम्यादन्यं निषिध्यान्यस्यारोपेऽपह्नवो मतः ॥ १४ ॥

यत्र सादृश्यात् अन्यं विषयं निषिध्यान्यस्यारोपः क्रियते तत्रापह्नवः । स च त्रिविधः अपह्नुत्यारोपः, आरोप्यापह्नवः, छलादिशब्दैरसत्यत्वप्रतिपादनञ्चेति । आद्य-द्वितीययोरुदाहरणं यथा—

कल्पान्तोद्युक्तकालाम्बुदपटलमिदं नो चमूरेणुजालं
नैते घोरप्रतापा दिशि दिशि तटितां वल्लयो निर्लसन्ति ।
नायं निस्साणनादः दलितगिरि नभोगर्जितं तज्जमेवं
त्वद्धाटीपूद्विग्नन्ते रिपुनरपतयो विम्बलक्ष्मोणिपाल! ॥

अत्र कल्पान्तेत्यत्र प्रलयघनत्वमारोप्य चमूरेणुत्वन्निषिध्यते । नैते घोरेत्यत्र प्रतापत्वमपह्नुत्य तटितामारोपः ।

तृतीयो यथा—

युद्धारम्भसमुद्धताध्वविसरत्कोपोद्भटन्दद्भट-
स्पीतामोदविजृम्भितप्रतिभय प्रक्ष्वेलितव्याजतः ।
श्रीमद्विम्बलभूप! वैरिहृदये दम्भोलिपातो दृढ-
स्सम्भूतो दलनं च दाहमधिकं धत्तेऽन्यथा तत्कथम् ॥

अत्र भटप्रक्ष्वेलितस्य व्याजपदेन असत्यत्वं प्रतिपाद्य दम्भोलिपातत्वमारोप्यते भीषणत्वसाधर्म्यात् ॥

उल्लेखालङ्कारः ।

एकस्यार्थस्य चित्रैर्निमित्तैर्बहुधा जनैः ।
उल्लेखने स्याद्उल्लेखालङ्कारः सूरिभिः स्मृतः ॥ १५ ॥

यत्र अर्थस्य चित्रैर्निमित्तैः एकस्य बहुधा बहुभिर्जनैरुल्लेखः निरूपणं क्रियते तत्रोल्लेखालङ्कारः । तदुक्तम्—

"यथारुचि यथाधित्वं यथाव्युत्पत्ति भिद्यते ।
आभासोऽप्यर्थ एकस्मिन् अनुसन्धानसाधितः ॥"

इति ।

रुच्यर्थयोगाभ्यां यथा—

कल्पद्रुमः कविकुलैः कमलेक्षणाभिः
कान्तारकार्मुकधरः कुटिलारिवर्गैः ।
कालान्तकः कुमुदिनीरमणः सुहृद्भिः
सङ्कीर्त्यते जगति विम्बलभूसहेन्द्रः ॥

अत्र एक एव विम्बलमहेन्द्रः अनेकैः कवीश्वरादिभिः दानसौन्दर्यकौर्याह्लादित्वरूपैर्निमित्तैः कल्पद्रुमादिरूपेणोल्लिख्यते । न चास्य रूपकादभेद इति वाच्यम् । रूपके रुच्यादिनिमित्तानुपादानात् प्रकृतोपरञ्जकत्वमात्रेण चारुतापादकत्वाच्च भेदो द्रष्टव्यः ।

श्लेषेण यथा—

जिष्णुर्वैरिविलुण्ठने जनकभूसंरक्षणे सेतुकृत्
भीमो भूरिभुजप्रतापवहने भीष्मः स्वसंरक्षणे ।
रामः केलिषु योषितां गुरुरसौ बुद्धेर्विलासेष्विति
श्रीमन्नुत्तरविम्बलक्षितिपते ! त्वं कीर्त्यसे सूरिभिः ॥

अत्र जिष्ण्वादिपदानां श्लिष्टत्वम् ॥

उत्प्रेक्षालङ्कारः ।

अन्यधर्माभिसम्बन्धादन्यत्वेनाध्यवस्यते ।
प्रकृतं यत्र तत्राहुरुत्प्रेक्षालङ्क्रियां बुधाः ॥ १६ ॥

यत्र प्रकृतस्य विषयस्य अप्रकृतधर्मसम्बन्धाद् अप्रकृतत्वेनाध्यवसायः तत्र उत्प्रेक्षेत्याहुः । अध्यवसायो नाम उभयोरन्यतरस्य अन्यतरनिगरणेन अन्यतराभेदसम्भावनम् । अध्यवसायस्सम्भावनमुत्प्रेक्षा तर्कः ऊहोऽभिमानश्चेति पर्यायाः । उत्प्रेक्षा द्विविधा वाच्या गम्या चेति । सम्भावनाप्रतिपादकानां नूनं प्राय इत्यादीनां प्रयोगे वाच्या । तदप्रयोगे गम्या । तदुक्तम्—

"मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः ।
उत्प्रेक्षावाचकाः शब्दा इवशब्दोऽपि तादृशः ॥"

इति । सापि प्रत्येकं जातिक्रियागुणद्रव्याणामध्यवसायविषयत्वेन चतुर्विधा । तेषां भावाभावरूपेण द्वैविध्यादष्टविधा । तदुक्तम् —

"लोकातिक्रान्तविषया भावाभावाभिमानतः ।
सम्भावनेयमुत्प्रेक्षा वाच्येवादिभिरिष्यते ॥"

इति । उक्तस्य अष्टविधस्य सम्भावनस्य गुणनिमित्तकत्वेन क्रियानिमित्तकत्वेन द्वैविध्ये षोडशविधा । अत्र चैतेषां स्वरूपहेतुफलोत्प्रेक्षाभिरपरं त्रैविध्यम् । निमित्तस्य उपादानानुपादानाभ्यां द्वैविध्ये जात्युत्प्रेक्षा चतुर्दशविधा* । ननु चतुर्विंशतिविधत्वेन कथं चतुर्दशविधत्वमिति चेन्न; जातिहेतुफलोत्प्रेक्षयोः हेतूपादानानुपादानद्वैविध्याभावाच्चतुर्दशविधैव । एवं क्रियागुणद्रव्याणामपीति वाच्योत्प्रेक्षा षट्पञ्चाशद्विधा, गम्योत्प्रेक्षा अष्टचत्वारिंशद्भेदा । गम्योत्प्रेक्षायां निमित्तस्य गुणत्वेन क्रियात्वेन वा चारुत्वविशेषाभावाद् एक एव भेद इति द्रष्टव्यम् । केचित्तु वाच्योत्प्रेक्षैव षण्णवतिविधेति वदन्ति । तत्र यथासम्भवमुदाहरणानि ।

उपात्तगुणनिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा —

जेतुर्दिशां बिम्बलभूमिपस्य
भुजस्थिरावासकुतूहलिन्याः ।
भूमेरियं सम्भृतसस्यसम्पद्
भाति स्फुटोच्चपुलकच्छटेव ॥

अत्र छटाशब्दस्य जातिवचनत्वात् जात्युत्प्रेक्षां । कुतूहलरूपगुणो निमित्तम् । सस्यसम्पदि पुलकच्छटात्वस्य कविप्रौढोक्तिसिद्धत्वाच्चोपमाशङ्कावकाशः ।

उपात्तक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा —

अन्यानपेक्षमखिलावनिधूर्वहत्व-
मालोक्य बिम्बलपतेरसकृद्भुजायाः ।
मुञ्चन्ति भूवहनखिन्नमहामहीध्रा
मोदाश्रुपूरमिव निर्झरवारि भूरि ॥

* चतुर्दशविधत्वं तु जातिभावस्वरूपोत्प्रेक्षाया जात्यभावस्वरूपोत्प्रेक्षायाश्च गुणनिमित्तकत्वक्रियानिमित्तकत्वाभ्यां द्वैविध्यस्य अनङ्गीकारात् । अन्यथा षोडशविधत्वापत्तेः ।

अत्र निर्झरे मोदाश्रुपूरत्वोत्प्रेक्षा । आलोकनक्रियाया निमित्तत्वम् ।

अनुपात्तनिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा —

विम्बलेशप्रतापाग्नेः शत्रुकान्तारवर्तिनः ।
धूमस्तोममहं मन्ये तदीयापयशोभरम् ॥

शत्रुराजापयशोभरे धूमस्तोमत्वमुत्प्रेक्ष्यते, निमित्तस्यानुपादानञ्च । यथा वा भदीये गौरीशतके —

कुटिलालीकलसन्तीं
कुरुविन्दललन्तिकां तवाद्रिसुते ! ।
अधिधनुरशोकमखं
मदनव्यत्याससंहितं मन्ये ॥

अनुपात्तनिमित्तजात्यभावस्वरूपोत्प्रेक्षा यथा —

गोदवर्मयशोराशिविलासे व्याप्तरोदसि ।
तमिस्राः परिदृश्यन्ते तमोविरहिता इव ॥

अत्र तमिस्राणां तमोजातिराहित्यमुत्प्रेक्ष्यते ।

जातिहेतूत्प्रेक्षा यथा —

आपातालमपारघोरसलिलैरापूरिताभ्यन्तरः
पाथोधिः प्रविगाढवाडवशिखिज्वालावलीढोऽनिशम् ।
अक्षीणत्वमयं दधात्यनुपमं विभ्राणनं बिभ्रतः
श्रीमद्बिम्बलभूमिपस्य विसरद्दानाम्बुपूरैर्ध्रुवम् ॥

अत्र समुद्रस्याक्षीणत्वे दानाम्बुपूरस्य हेतुत्वमुत्प्रेक्ष्यते ।

जात्यभावहेतूत्प्रेक्षा यथा —

द्रुता दिगन्ताद्रिगुहासु लीना
द्विषज्जना बिम्बलभूमिपस्य ।
गाढान्धकारच्छलतो निगूढाः
प्रतापभङ्गैरिव मूर्छितैः स्वैः ॥

अत्र दिगन्ताद्रिगुहावर्तिनां द्विषामाक्रान्तौ प्रतापभङ्गस्य प्रतापाभावस्य हेतुत्वमुत्प्रेक्ष्यते । अन्धकारेऽन्धकारत्वमपह्नुत्य प्रतापभङ्गत्वोत्प्रेक्षणात् सापह्नवहेतूत्प्रेक्षा ।

अत्र गुणश्रेणयस्संख्यातुं न शक्यन्त इति गुणश्रेणीनां संख्यासम्बन्धेऽपि सम्बन्धाभावकथनादतिशयोक्तिः ।

असम्बन्धे सम्बन्धो यथा —

गोदक्ष्मापालघाटीचटुलपदचलद्धारुघोटीखुराग्र-
क्षुण्णक्षोणीतलोद्यत्क्षुभितदशदिशाभोगमाक्रान्तनाकम् ।
धूलीजालं समन्तात् गगनतलधुनीपूरमध्ये पतित्वा
पङ्कीभूतं प्रयाति प्रभवपदमिदं तज्जुषां पङ्कजानाम् ॥

अत्र धूलीजालस्य गगनधुनीसम्बन्धाभावेऽपि सम्बन्ध उक्तः कविप्रौढोक्त्या ।

कार्यकारणयोः पौर्वापर्यविपर्यये यथा —

गण्डोद्दामगलन्मदस्रुतिभरैर्गन्धद्विपानां गणैः
प्रागेवेह परिष्कृतानि भुवनद्वाराणि सङ्ख्यावताम् ।
प्रायः फुल्लसरोरुहोदरगतश्रीसोदरा मेदुराः
पश्चात्तेषु पतन्ति बिम्बलपतेः स्फाराः कटाक्षाङ्कुराः ॥

अत्र सङ्ख्यावतां ऐश्वर्यवातेः बिम्बलपतेः कटाक्षपातानन्तरभाविन्याः पूर्वभावः कविप्रौढोक्त्या कथितः ॥

तुल्ययोगिताउद्धारः ।

अन्येषां प्रस्तुतानां वा तुल्यधर्मान्वये सति ।
औपम्यगम्यतायां च चतुर्धा तुल्ययोगिता ॥ १८ ॥

यत्र प्रस्तुतानां अप्रस्तुतानां वा एकधर्मेणसम्बन्धः औपम्यं च गम्यते सा तुल्ययोगिता । तुल्येन धर्मेण एकेन धर्मेण योगोऽस्यां इति अन्वर्थसंज्ञेयम् । धर्मश्च द्विविधः — गुणः क्रिया च, तेन चतुर्विधा ।

प्रकृतानां यथा —

अर्थिनामभिमतार्थपूरणं
शत्रुराजकपुरीविलुण्ठनम् ।
रक्षणञ्च शरणार्थिनां नृणा
गोदवर्मनृपते ! तवाद्भुतम् ॥

अत्र अर्थिजनाभिमतार्थपूरणादीनां प्रस्तुतराजधर्मत्वात् प्रस्तुतत्वम् । अद्भुतत्वं गुणः । अत्रैव 'विराजते' इति पाठे क्रिया ।

अप्रकृतानां यथा —

भूचक्रं त्वयि बिभ्रति स्वभुजयोर्भूयो दिशां रक्षणं
कुर्वत्युज्ज्वलितप्रतापवलये श्रीगोदवर्मप्रभो ! ।
दिग्मातङ्गघटाभुजङ्गमपतिर्दिक्पालवर्गाश्च ते
दीव्यन् व्योम्नि दिवाकरोऽपि भुवने वैयर्थ्यभाजोऽभवन् ॥

अत्र उपमानत्वेनाप्रकृतानां दिग्गजादीनां व्यर्थत्वगुणेनैकेन योगः । 'प्रायः कदर्थीकृताः' इति पाठे क्रिया ॥

दीपकालङ्कारः ।

मिलितानां तथैषां तु प्रोच्यते दीपकं बुधैः ।

यत्र एषां प्रकृताप्रकृतानां च मिलित्वा तथा गुणक्रियारूपैकधर्मयोगः तत्र दीपकालङ्कारः । अस्मिन् प्रकृताप्रकृतानां सम्भूयैकधर्मयोगः । पूर्वस्मिन् प्रकृतानामेव पार्थक्येन एकधर्मयोगाद् भेदः । अत्र उपमानोपमेयभावस्य वास्तवत्वेऽपि वाचकेवादेरनुपादानात् गम्यता । प्रकृताप्रकृतान्यतरसान्निध्यमधितिष्ठन्नपि साधारणो धर्मः प्रसङ्गादन्यदपि दीपयतीति दीपकम् । तदुक्तं विन्द्वलङ्कारे—

"यः प्रस्तुताप्रस्तुतयोर्वर्गे कुत्रापि सङ्गतः ।
समानो धर्म एकोऽन्यद्दीपयेत्तत्र दीपकम् ॥"

इति । समानधर्मस्य वाक्यादिमध्यान्तगतत्वेन धर्मस्य गुणक्रियारूपत्वेन द्वैविध्यात् षट्प्रकारं दीपकम् । क्रमेण यथा—

भाति विम्बलनृपेण भूतलं
भास्करेण च पयोदपद्धतिः ।
द्वेषणेन नमुचेस्त्रिविष्टपं
पन्नगाधिपतिना पदं बलेः ॥
पूरेण तावद् विरजापगाया
ग्राह्यं पदं भाति नभोविभागः ।
मन्दाकिनीतुन्दिलवीचिजालै-
र्मही यशोभिस्तव गोदवर्मन् ! ॥

गुम्फितं गुणसामग्र्यं गोदवर्मनृप ! त्वयि ।
सौरभं सुमनःपुष्पे चन्द्रे ज्योत्स्ना च राजते ॥

पदार्थगतालङ्कारद्वयनिरूपणानन्तरं वाक्यार्थगतालङ्कारद्वयं निरूप्यते ।

प्रतिवस्तूपमालङ्कारः ।

प्रतिवस्तूपमा प्रोक्ता यत्र वाक्यार्थयोर्द्वयोः ॥ १९ ॥
सामान्यं द्विविधा सा साधर्म्यवैधर्म्यभेदतः ।

यत्र वस्तुप्रतिवस्तुभावेन वाक्यार्थयोस्सामान्यं - समानता तत्र प्रतिवस्तूपमा । वस्तुशब्दस्य वाक्यार्थवाचित्वात् प्रतिवस्तु प्रतिवाक्यार्थ उपमा यस्यागिति प्रतिवस्तूपमा । सा द्विविधा साधर्म्यवैधर्म्यभेदेन । क्रमेण यथा—

समा न हि नृपाः सर्वे गोदवर्मनृप ! त्वया ।
भजन्ते किं नु मणयश्चिन्तामणिसमानताम् ॥

अत्र वाक्यद्वयेऽपि पर्यायशब्देन एकस्य समानत्वधर्मस्य कथनाद् वस्तुप्रतिवस्तुभावः ।

वैधर्म्येण यथा—

अर्थिनोऽभिलषितार्थसिद्धये
गोदवर्मनृपतिं भजन्त्यमी ।
चातकाः किमु विहाय वासवं
साधयन्ति पुनरन्यसेवनम् ॥

अत्र भजनधर्मस्य पर्यायशब्देन व्यतिरेकमुखेन कथनात् ॥

दृष्टान्तालङ्कारः ।

वाक्यार्थयोर्यत्र बिम्बप्रतिबिम्बतया भवेत् ॥ २० ॥
सामान्यं तत्र दृष्टान्तालङ्कृतिः पूर्ववद् द्विधा ।

यत्र बिम्बप्रतिबिम्बभावेन वाक्यार्थयोस्सादृश्यं तत्र दृष्टान्तालङ्कारः । दृष्टोऽन्तो निश्चयो यत्र इति चान्वर्थाभिधानोऽयम् । स च पूर्ववद् द्विविधः । क्रमेण यथा—

द्वितीयो यथा—

गोदवर्ममहीपतुः सितचारुयशश्रियः ।
फुल्लेषु परिदृश्यन्ते फाल्गुनेष्वसितेष्वपि ॥

अत्र उपमेयप्रकृतराजगुणश्रीरूपवर्णानां तत्पाने फाल्गुनत्वात् तत्सहचारधर्मस्याक्षेपात् निदर्शनालङ्कारः ॥

[illegible]

[illegible] ॥ २५ ॥

[illegible]

यत्र उपमानाद् उपमेयस्याधिक्यं तत्र चेत् हेत्वन्तरं तस्माद्भिन्नात् व्यतिरेकालङ्कार इत्यर्थः । यथा—

गोदवर्मनृपे [illegible] पुनरुक्तैकरत्नताम् ।
नो विद्मः किं कलङ्कितानयं निष्कलङ्कश्च शशीति ॥

अत्र उपमेयस्य रत्नः उपमानात् शशाङ्कादधिक इति व्यतिरेकः ॥

सहोक्तिलक्षणम् ।

यत्र प्रकृतस्योत्कर्षादि भिन्नया सहार्थतः ॥ २६ ॥

अन्यस्य वर्ण्यतोत्कर्षा सहोक्तिस्तत्र गीयते ।

यत्र कार्यकारणपौर्वापर्यविपर्ययरूपस्य भेदेऽभेदाध्यवसायरूपस्य वा अतिशयोक्त्या एकस्य प्राधान्येन अपरस्य सहार्थेनान्वयः कथितोत्कर्षार्थवशादि तत्र सहोक्तिः । अत्र द्वयोरपि प्रकृतत्वाद्धोपमाशङ्का ।

पौर्वापर्यविपर्यरूपातिशयोक्तिमूला यथा—

जन्यक्षितौ जितवरगोदवर्मधनुर्गुणार्पणजो निनादः ।
त्रस्तैरसं द्वेषिनृपात्मजैर्दिगन्तदेशानतिलङ्घ्य याति ॥

अत्र ज्याशब्दश्रवणोत्तरकालभावि शत्रुपलायनस्य रङ्गशावकपनात् सहोक्तिः ।

भेदे अभेदरूपातिशयोक्तिमूला यथा—

उद्धता विम्बलीशेन बलाद्धृत्वा युधि द्विषः ।
अन्तर्यान्ति सहसा चापेन गुणिना सह ॥

क्षितिः क्षुधा राजतरोमहर्षणं
रणाङ्गिरे राजति गोदवर्मा ॥

अत्र क्षुधाशब्दस्य नारणविशेषणत्वात् क्षुधाक्षितिः इति रजतरोमहर्षणं इति क्षुधो नारिकात्वं राज्ञो नायकत्वं च प्रतीयत इति ।

औपम्यगर्भविशेषणाद्यथा—

स्फुरच्चटिदलङ्कारस्फारद्वज्जितनिर्भरः ।
ददन्नु वसुवर्षेण राजते निखलेश्वरः ॥

अत्र स्फुरच्चटिदलङ्कार इत्यौपम्यगर्भविशेषणाद् जनमनोहरजनानामतीति

परिकरालङ्कारः ।

विशेषणस्याभिप्रायार्थता अत्र तत् तु ॥ ९६ ॥

अलङ्कारः परिकरः श्लेषौ विशेषणस्य ।

अत्र विशेषणस्य साभिप्रायता तत्र परिकरः । यथा—

निर्मला कीर्तिलहरी विचरन्ती जगत्त्रयम् ।
पुनाति बिम्बत्पतेर्गोदवर्मणस्तीमतः ॥

अत्र निर्मलेति विशेषणं पावनत्वाभिप्रायगर्भम् ॥

परिकराङ्कुरालङ्कारः ।

साभिप्रायं विशेष्यं चेद् यदैक्यात्रैकाङ्कुरः ॥ ९७ ॥

अत्र विशेष्यं साभिप्रायं तत्र परिकराङ्कुरः । यथा—

नाहं व्याप्तो न च सुरुचिरे व्याप्ये न भव्ये
नाथ, श्रोत्रोदरपरिषदां नापि वक्त्रेऽम्बुजस्य ।
व्याप्तास्ते ते तव गुणगणाः पर्व वा यस्य तेन
वर्ण्यो वीरक्षितिपतिरिति गोदवर्मक्षितीन्द्रः ॥

अत्र व्याप्तादिशब्दानां चेदं नाधमेषामगर्भत्वम् ॥

श्लेषालङ्कारः ।

अत्र श्लेषो भवेत्साभ्ये विशेष्यविशेषणयोः ।
विशेष्यस्यैव साभिप्रायत्वे तत्परिकरो न तत्त्विना ॥ ९८ ॥